
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 2199 विषय योगशास्त्र

नाव पातंजलसूत्र भाष्यस्य किंचित टीप्पणी

लेखक / लिपीकार — (MSS)

पृठ 10 काळ — पूर्ण / अपूर्ण

॥ श्रीकृष्णानंदरामसमर्थौ ॥

॥ श्रीपातञ्जलसूत्रभाष्यस्य यत्किंचित्टिप्पणी ॥

१६ क्लिष्टः = निःसंशयीनि पर्वाणि = धर्माधर्मसमूहः नांतरीयकं = अभेदरूपं ॥

१७ स्थूलः = चतुर्भुजादि ध्येयं । सूक्ष्मः तन्मात्रादिः ॥ किंच

१८ आलम्बनीकरणं = आश्रयणं । अभ्यासप्राप्तिवशात् रूपस्याप्याक्रिकरणात् निर्बीजः निरालंबनः । विदेहाः

१९ स्वसंस्कारः साधिकारः = इन्द्रियउपासकाः । विदेहाः स्वसंस्कारविपाकं = प्राप्तानधिकाले । पूर्वसंस्कारे सति = नैरन्तर्यात्मीयकं ॥ अतिवाहयंति । अतिक्रम्य तथा यांति पुनः संसारे विशंति । दशमन्वन्तरानंतरं । तथा प्रकृत्युपासकाः शतमन्वन्तरानंतरं पुनर्यान्ति संसारे । अ

२० पाति = रक्षति । जन्ममरणात् । स्मृतिः = ध्यानं । समाधीयते = योगपंगतसानाकुलम् = अविछिन्नं ॥ समाधीयते ॥ विपर्ये = यत्नं ॥ प्रसन्नविवेकः संप्रज्ञातसमाधिः प्रज्ञाभवति । तस्याभ्यासात् । विषयवैतृष्ण्यं = वैराग्यात् असमाधिः

२१ तेष्वेव उपायानां पर्यन्तं अवतरणभाष्यतदनंतरं सूत्रेण सहितोन्वयः ॥ नंतरं आसन्नः सिद्धतमा लाभः । अधि = अधिकं प्रमाणं येषां ते अधिमात्राः

२२ आसन्नः = सिद्धमेव । [illegible] सिद्धतरत्वादि

२३ प्रणिधानात् भक्तिविशेषात् = कायिकवाचिकमानसिकात् । आवर्जितः = अभिमुखीकृतः तमनुध्यायीनं । अभिध्यानं = अनागतेर्थे इच्छा । इदं यस्याभिमतमस्त्विति । तन्मात्रेण अनुग्रहाति ।

२४ कुशला० = धर्माधर्म० व्यतिरिक्तात्मनः = चेतनाचेतनात्मकमेव विश्वं युक्तं = संकलितम् । ईश्वरस्य चेत् स्वचेतनत्वाहिमत्त्वनम् । तस्याऽऽवर्जनम् अचेतनत्वान्नास्ति । चितिशक्तिरिति चेत् चेतनतान्नहि औदासीन्यात् असंगत्वात् आवर्जनं कुतः । तस्मात् को ईश्वरो भजनीयः

विपाकः = जात्यायुर्भोगाः । आशयाः = चित्तभूमौ विपाकगुणपर्यन्तवासनाः एवाऽऽशेरते इत्याशयाः । त्रीणि बंधनानि = १ प्रकृतिलयानां प्राकृतो बंधः । २ वैकारिको विदेहानां । ३ दक्षिणाबंध्योदिव्यादिव्यविषयभोगानां ३ ॥ (शैलूषः नटः । आहार्य्ये = कल्पितम् ।) निमित्तं = करभः = हतिः । करभः करस्य बहिः ॥) निमित्तं = प्रमाणं ॥ शास्त्रं = श्रुतिस्मृतिइतिहासपुराणानि । प्रसन्नज्ञान पूर्वं हि स्वपरस्याद् । शब्दोत्कर्षयोः = वाचकवाच्य संबन्धयोः । एतस्मात् = ईश्वरबुद्धिसत्वप्रकर्षवाचकाच्छास्त्राद् । भवति = स्पृशते । विषयेण विषयिणो = इच्छामसदेव ०५ मा कामयत = अनिहतेच्छता । (परिपक्वतं =

[illegible]

३ [illegible]

३० धातवो = वातपित्तश्लेष्माणः शरीरधारणात् । रसः = अशितपीताऽऽहारपरिणामविशेषः करणानि = इंद्रियाणि । तेषां वैषम्यं = न्यूनाधिकभावः अकर्मण्यता = अकर्मानर्हता । अभावनम् = अकरणं तत्र प्रयत्ने = कायस्य गुरुत्वं = कफादिना० चित्तस्य गुरुत्वं तमसा गर्द्धः तृष्णा । मधुमत्यादयः समाधिभूमयः

३१ प्रतिकूलवेदनीयं = दुःखं = आध्यात्मिकम् = शारीरं = व्याधिवशात् । मानसं = कामादिवशात् । आधिभौतिकं = व्याघ्रादिजनितं । आ० दै० ग्रहपीडादिजनितं । आचामति = पिबति = प्रवेशयति । अतिसर्जतः स समाधयंगरेचकविरोधी । निःसा० = निःसारयति । अनि० स पूरक विरोधी

३२ एकतत्त्वम् = ईश्वरः प्रकृतत्वात् । प्रत्यर्थनियतं विषयीभूतविषयान्न्यगामि अन्तरेण च प्रत्ययमात्रम् = निराधारं निरूपं । अर्प्यमाणे = विषयीभूतविषये । अथ = नहि । गोमयपा० उभयगव्यत्वात् । प्रयत्नप्रत्ययो आधिपति = न्यायाभासः । न न्यायः यत् तत् । अव्ययंकर्मी । यः सः अर्थकर्मी पैस्य चित्तस्य । परिकर्म = चित्तस्य स्थैर्यहेतुचित्तप्रसादसाधनं ।

३३ कुर्यादिति क्रियापदं सूत्रांते० अध्याहार्यं । मैत्री = सौहार्दं = द्वेषाभावो नतु स्नेह सुहृद्भावात्तस्य वंधात्मकत्वात् । एवं मुदितापि शोकनिवृत्तिर्न तु हर्षः तस्य रागहेतुत्वात् । ईर्ष्यादि = अक्षान्तिपराभ्युदयासहनं करुणा । आत्मनीव = परस्मिन् । दुःखप्रहाणेच्छा । असूया = परगुणेषु दोषाऽऽविष्करणम् । अमर्षः क्रोधः ईर्षा = मुदिता = हर्षः । उपेक्षा = माध्यस्थ्यं । ० रुक्कौ = सत्वोत्कर्षसंपन्नः संभवति ।

३४ प्रच्छर्दनं = रेचनं । विधारणं = कुंभकः । रेचनोत्तरं पूरणं विनो विधारणासंभवात्पूरकोऽप्यर्थादायातः । वा शब्दो वक्ष्यमाणोपायाऽऽनेरापेक्षो विकल्पार्थः न मैत्र्यादिभावनाऽपेक्षया । तया सहसमुच्चयात् । प्र० वि० = योगशास्त्रोक्तात् । येन कोष्ठ्यो वायुर्नासिकापुटाभ्यां शनैः रेच्यते । विधारणं = प्राणायामैः । रेचितस्य प्राणस्य कोष्ठस्य वायो यदायामः = बहिरेव स्थापनं न तु सहसा प्रवेशनं । गतो नरसूत्राभ्यां स्थितिः संपादयेत् इति आचार्य संबंधनीयं ।

३५ संवित् = साक्षात्कारः एवं अन्यास्वपि प्रवृत्तिषु येऽन्यत्र । एतत्त्यागमात्रस्य ये तव्ये नोपपत्तितः विधमंति = अपसारयंति । एतेषां = शास्त्रानुमानाचार्योपदेशानां । उपोद्बलनार्थमेव = शास्त्राद्यभिहितार्थविषयकसंशयापनोदनार्थं । आ अपवर्गात् = कैवल्यपर्यन्तं सर्वमपि सूक्ष्मं सुश्रद्धीयते = इदमित्थमेवेति विश्वस्यते । दार्ढ्यं भवति शास्त्रं विश्वसिति । अनियताः = इत्यादिनाद्धाप्रत्ययादि योगः उपदिष्टार्थैकदेशप्रत्यक्षीकरणेन श्रद्धातिशयो जायते । तन्मूलाभ्यासानादयोऽस्याऽऽसूहं भवन्तीत्यर्थः । आगमादेः सम्प्रतिः अतः परास्य धारणा तालुरसनाग्रनिपीडनाद्वा मनः प्राणनिरोधनाद् इत्यादिमैत्र्युपनिषदाद् । ज्योतिष्मती स्पर्श

[illegible] (उभयोरप्यारसुल)

२५ प्रत्युत्पन्न = वर्तमानार्थकः शब्दः । (प्रत्युत्पन्नं [illegible])

संज्ञा = ईश्वरादिः आदिपदेन षडंगता दश[illegible]

आदिविद्वान् = कपिलमहामुनिः

२६ अनवच्छेदार्थेन = अनवच्छेदेन. प्रयोजनेन नोपवर्तते = न वर्तते. कालः तु = शतवर्षादि. प्रकर्षस्य गतिः = प्राप्तिः । प्रत्येतव्यः = आगमात् इति भावः

२७ वाचकत्वं = प्रतिपादकत्वम्. स्थितः = स्थित एवैषां सर्वदाऽऽर्थैः स्वाभाविकसम्बन्धः । संप्रतिपत्तिः = सदृशव्यवहारपरंपरया।

२८ भावनम् = पुनः पुनश्चेतसि निवेशनम्. स्वाध्यायात् = प्रणवजपात् अनन्तरं योगमभ्यसेत्. समाधेरनन्तरं = पुनः स्वाध्यायमामनेत् = प्रणवजपमभ्यसेत्. पूर्वभाष्य-विद्यानं इत्याद्य अनेन सूत्रेण सह अन्वनीयं

२९ प्रतीपम् = विपरीतम्. अभ्येति = विजानाति इति प्रत्यक्. स चासौ चेतनश्चेति प्रत्यक्चेतनोऽविद्यावान् पुरुषः. अधिगमः = ज्ञानं. शुद्धः = कूटस्थनित्यः उदयव्ययरहितः. प्रसन्नः = क्लेशवर्जितः. केवलः = धर्माधर्मापेतः. अतएव अनुपसर्गः. उपसर्गाः = जात्यायुर्भोगाः. प्रत्यक्सन्निस्तु स्वात्मनि साक्षात्कारहेतुर्न परमात्मनि ॥ [illegible]

[illegible]

चतानां धारसवतीपरा ॥ गन्धवत्यपराग्नीन्का [illegible]

३६ [illegible]तस्य तु प्रवृत्तयः इत्यस्य व्यास पादे यथार्थः ।

विगतशोका = शोकरहिता. ज्योतिष्मती = प्रकाशरूपा. अनुवर्तते इत्यंतं सूत्रेण अन्वयः कर्तव्यः. बुद्धिसंवित् = चित्तसाक्षात्कारः. यत्र अस्मिता समापन्नं चित्तम्. हृदयपुंडरीकं = उदरोरसोर्मध्ये यत्पद्मं अधोमुखं तिष्ठति अष्टदलं रेचकप्राणायामेन तदूर्ध्वमुखं कृत्वा तत्र चित्तं धारयेत्. (कर्णिका = पद्मबीजकोषः) शान्तं = अपगतरजस्तमस्तरंगं. अनन्तं = व्यापि. अस्मितामात्रं = तनु नानाप्रभारूपम्. उक्तं पञ्चशिखेन. तमणुं = दुरधिगमत्वात्. आत्मानं = अहंकारास्पदं. अनुविद्य = अनुचिन्त्य. अस्मीत्येवं तावत् संप्रजानीत इति. [illegible]

३७ वीतरागः = कृष्णद्वैपायनप्रभृतयस्तेषां चित्तं तदेवाऽऽलंबनं तेनोपरक्तमिति. [illegible]

३८ स्वप्नज्ञानालंबनं = यदा खल्वयं स्वप्ने सुंदरां मनोहरां भगवतो महेश्वरस्य प्रतिमामाराधयन्नेव प्रबुद्धः प्रसन्नमनास्तदा तामेव स्वप्नज्ञानावलंबनीभूतामनुचिन्तयतस्तस्य तदेकाकारमनस्तत्रैव चित्तं स्थितिपदं लभते. निद्रा चेह सात्त्विकी गृहीतव्या यस्याः प्रबुद्धस्य सुखमहमस्वाप्समिति एकाग्रहितस्यां मनो भवति. ज्ञानं च संशयरहितं =

[illegible]

संं० २४ ॥श्रीकृष्णानंद रामसमर्थ॥

॥श्रीपातञ्जल सूत्राणां किञ्चित् टिप्पणिः॥

१ क्षिप्तं = दैत्यदानवादीनां अथवा दुर्विणमद विभ्रान्तानां निषधिणां पुरुषाणां स देवरजसायुक्तं मूढं = रक्षःपिशाचादीनां इव पादकृत्यो न्मत्तानां पामरनराणां तमःसुरके कामिनी द्रावति मता चेतं। विक्षिप्तं = क्षिप्ताद्विशिष्टं देवानां प्रथमभूमिकारूढाणां जिज्ञासूनांच। सद्भूतं = परमार्थभूतं अर्थं ध्येयं। प्रद्योतयति = साक्षात्कारयति॥ क्लेशान् = अविद्यादीन्। श्लथयति = अदृढोपाद नाक्षमाणि करोति। स्वकार्य्यादवसादयति।

२ प्रख्यारूपं सत्वगुणं। प्रवृत्तिः रजः स्थिति = तमोगुणं प्रख्यारूपं त्रिगुणं = रजस्तमसत्वादिगुणत्रयानिर्मितं सर्वतः सर्वत्र प्रद्योतमानं विशेषाः पञ्चमहाभूतानि सूक्ष्मशरीराणि स्थूलदेहाघटादयः अविशेषाः तन्मात्राणि लिङ्गमात्रं महत्तत्वं अलिङ्गं = प्रधानं पुरुषः चेतनाशक्तिरियेषु प्रद्योतमानम्। अनंतानं = दर्शितविषया॥ निर्बीजः = क्लेशरहितः कर्माशयो जात्यायुर्भोगाः बीजं तस्मान्निर्गतः इति निर्बीजः।

८ स्थूलार्थ = सत्वार्थविषयात् ९ पारोहि = अंतर्गतः

१० विशारदी = सद्रूपा। स्पन्दनं = अकर्मण्यम्। क्लांतं = ग्लानियुक्तम्। अनवस्थितं = रजोऽयुक्तं। अलसं = कार्याक्षमम्। पुषितमिव = पुरैरप्रहतैर्बद्धं वा।

११ असंप्रमोषः = अस्तेयः निर्भासः = प्रकाशः स्वव्यंजकम् = कारणं वा उद्बोधकम्। अंजनम् = आकारो वा फलाभिमुखीकरणं। आकारः = रूपम्। पूर्वा = प्रथनम्। पूर्वा = प्रथमा। भावित = कल्पित। अभावित = अकल्पित।

१२ प्राग्भारा = उच्चदेशाः विवेकाभिप्रयानिम्ना प्रवृत्तिः = गंभीरता अगाधता रात्रिसमन्वितं ज्ञानं

१३ अत्यन्तिकस्य = राजसतामसवृत्तिहीनस्य। प्रशांतता = विमला सत्वा॥

१४ द्राक् = झटितेन। सहसा।

१५ प्रसंख्यानबलात् = साक्षाद्दोषदर्शनात् संज्ञाभेदः यतमान संज्ञा। व्यतिरेक संज्ञा एकेन्द्रिया। वशीकारसंज्ञा। एकायाप्येव अंतर्भावः निरूपणाम्

१६ आप्यायितबुद्धिः तृप्ता परिसमाप्तपुरुषार्था प्रसादितं = धर्ममेघा। ख्याति = वृत्तिः

श्रीमच्छ... [illegible] ... २११२

३९ किंबहुना यदेवाभिमतं तत्र देवतारूपमित्ति·
४० समापत्तिः = संप्रज्ञातो समाधिः
४१ अभिजातस्य = निर्मलस्य· उपाश्रय = उपाधिः जपा
कुसुमादिः उपरक्तः = तच्छायापन्नः ग्राह्या०कं०=
ग्राह्यं च तदालंबनश्च तेनोपरक्तं = तदनुविद्धं· ग्राह्य
समापन्नं = ग्राह्यतामिव प्राप्तमिति यावत्· विश्वभेद
श्चेतनाचेतनस्वभावो = गवादिर्घटादिश्च द्रष्टव्यः तद्
अनेन वितर्कविचारानुगतौ समाधी दर्शितौ· ग्रहणेषु =
अनुविद्धं· आत्मीयमंतःकरणरूपमपिधाय ग्रहणमिव
बाह्यं करणमिवापन्नमिति· तदनेनानंदानुगतं मुक्तो·
अस्मितादेःस्पदं हि ग्रहिता पुरुषः, पुरुषता विशेषा
दनेनैव मुक्तोऽपि पुरुषः शुकप्रह्लादादिः समाधिविष
यतया संग्रहीतव्यः, नन्वत्र ग्रहीतृ ग्रहण ग्राह्येष्विति
सौत्रः पाठक्रमोऽर्थक्रमविरोधान्नादर्तव्यः एवं भाष्येऽ
पि प्रथमं भूतसूक्ष्मोपन्यासोऽप्यनादरणीय इति· तत्र
समापत्ते भेदाः सवितर्का· निर्वितर्का० सविचारा· निर्वि
चारा·
तत्र = तासु समापत्तिषु मध्ये· सवितर्का· अन्वयव्यतिरे
काभ्यां परीक्षकैः विभज्यमानाः शब्दधर्माः ध्वनिपरिणा
ममात्रस्य शब्दस्योदात्तादयो धर्माः· अर्थस्य धर्माः
जडत्वमूर्तत्वादयो· अन्ये प्रकाशमूर्तिविरहादयो ज्ञा
नस्य धर्मा इति तस्मादेतेषां० पंथाः = स्वरूपभेदोऽन्वयनपा
नः तत्र विकल्पितेन गवादयो धर्मे· तदनेन योगिनोऽपरं प्रत्य
क्षमुक्तं·
अन्तरेण पूर्व भाष्येण संगत्या विना
परिशुद्धिः = अपनयः संकेतश्चायं गौरिति शब्दार्थ
योर्नानामिति तरेतराध्यासात्मा· तद्भूतं = तदनुपक्व
नेन श्रुता० = न च यद्यस्य कारणं तेनाद्विषयं भवति·
न हि सातं× धूम× वह्निज्ञानकारणमिति वह्निविषयं
न तस्माद्विकल्पैप्रत्यक्षेण गृहीताविकल्प्यापादेशान्ति
चोपपादयन्ति च· शब्दसंकेतश्च = श्रुतं चानुमानं
च तेषां ज्ञानमेव विकल्पः तस्मात् स्मृतिः तस्याः परि
शुद्धिः = अपगमः तस्यां· अत्र च सं[illegible] तस्मात् तेप
रिशुद्धिहेतुः श्रुतादिज्ञानं स्मृतिपरिशुद्धिश्च हेतुम
ती· अनुमानश्च = शब्दश्च कर्मसाधनोऽनुमेय
वाचकः एकबुद्ध्युप० = एकां बुद्धिमुपक्रमते =
आरभते इति बु० अर्थात्म = अर्थस्वरूपं· अणुप्र
चयः = अणूनां प्रचयः = स्थूलरूपः परिणामः॥
फलेन· व्यक्तेन = तदनुभवलक्षणेन तद्व्यवहारलक्ष
णेन च· स्वव्यंजकं = स्वाभिव्यक्तिहेतुसामग्र्या भिव्य
ज्यमानः सन् प्रादुर्भवति; अतीतावस्थां प्राप्नोति·
× तिरोभवति = × प्रत्ययविशेषः = स्थूलरूपः परिणामोऽ
वयवी· आघ्रातं = ज्ञेयं· आघ्रातं = पानांतरं आम्नातं·
अभिव्यक्तो = घटादिधर्मो यैस्ते तथोक्ताः घटादिधर्मो
पगृहीता इति यावत्· देश = उर्ध्वाधःपार्श्वादिः काल
वर्तमानः निमित्तं = पार्थिवादिपंचभूतानां प्रधान
तन्मात्रेभ्यः उत्पत्तिर्नादिदं निमित्तं भूतसूक्ष्माणां· उदि

कारणं· सवृ... [illegible]
शांताः = अतीताः· उदिताः = वर्तमाना· अव्यपदेश्याः
भविष्यन्तः· सर्वधर्मानु = सर्वधर्मानुगतेषु· सर्वध
र्मात्मकेषु = सर्वधर्माणामाश्रयेषु· उपरञ्जन्ति =
स्वसमानाकारं करोति· उभयोः = निर्वितर्कानिर्विचा
रयोः· विकल्पहानिः = शब्दार्थविकल्पशून्यता व्याख्या
लिङ्गमात्रं = महत्तत्त्वं· अलिङ्गं = प्रधानं·
अन्वयिकारणं = उपादानकारणं· हेतुः = निमित्तकारणं
बहिर्वस्तुबीजाः अस्मिता... [illegible]
बीजं यासां ता बहिः एवंकारो = भिन्नक्रमः
समापत्तयो = ग्राह्यविषयाः सबीजतया नियम्यन्ते·
सबीजता = अनियतता· ग्राह्येऽन्तस्थः समापत्तयो
हीत्रग्रहणयोश्चान्तस्थः इत्यष्टौ समाधयो भवन्ति·
ऋतार्थविषयः यथार्थवस्तुविषयः· क्रमाननुरो
धी = युगपत् सर्वार्थप्रवाही· स्फुट = प्रत्यक्षो ज्ञाना
लोको न श्रुतानुमितरूपः इत्यर्थः शोऽन्यतो =
दुःखत्रयपरीतान् जनान् जानाति·

[OrderDescription]
,CREATED=09.09.19 17:05
,TRANSFERRED=2019/09/09 at 17:11:47
,PAGES=6
,TYPE=STD
,NAME=S0001711
,Book Name=M-2199-PATANJAL SUTRA BHASHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,